# कारकार्थनिरूपणम्

हंसराजजोशी
जनतासंस्कृतमाध्यमिकविद्यालयः, विजौरी, दाङ
hansrajjoshi001@gmali.com

**शोधसारः**

अन्वेषणात्मकलेखोऽयं व्याकरणशास्त्रस्य कारकविषयस्योपरि अतीव सूक्ष्मरूपेण विमर्शं कृत्वा विरचितोऽस्ति। समाजे परस्परं भावनाया आदानाय प्रदानाय च शब्दप्रयोग अपेक्षितो भवति। शब्दश्च वाक्यात्मक एव अर्थबोधको भवति। तत्र वाक्यकिमिति जिज्ञासा सम्भवति। अस्याः जिज्ञासायाः निराकरणाय वाक्यविषयकं चिन्तनमपेक्षितं भवति। विशेषतो व्याकरणशास्त्रे वाक्यविषयकं गम्भीरं सूक्ष्मञ्च चिंतनमुपलभ्यते। वस्तुतः वाक्यमेकं निरवयवं पूर्णं कथननमस्ति। वर्णानां वाक्यावयवानां पदानां पदावयवानां च निरूपणं तु कल्पना मात्रमिति सिद्धान्तः। पदप्रारम्भ एव तस्मिन् वाक्यस्फोट- सिद्धान्ते प्रवेशः कठिन इति वाक्यावयवानां पदादीनां निरूपणं विधीयते। वाक्यलक्षण निरूपणसमये कोषकारः कथयति सुप्तिङन्तचयो वाक्यमिति। किन्तु केषाञ्चन सुबन्तानां तिङन्तानां च पदानां समूहमात्रं वाक्यं भवितुं न शक्नोतीति विचार्य लक्षणान्तरं प्रदर्शितं क्रिया वा कारकान्विता। कारकसहिता क्रिया वाक्यमिति तत्तात्पर्यम्। तत्र वाक्यकाररूपेण विख्यातः कात्यायनो वाक्यलक्षणमित्थं बूरते— आख्यातं साव्ययकारक विशेषण वाक्यमिति। आख्यातपदस्यार्थो भवति क्रियापदम्। अव्ययसहितं कारकसहितं विशेषणसहितञ्च आख्यातं वाक्यमित्युच्यते। यथा अव्ययसहितमाख्यातं उच्चैः पठति इति। कारकसहितमाख्यातं रामः वनं गच्छति इत्यादिः। विशेषणसहितमाख्यातं सुष्ठु पचति इत्यादिः। एवं प्रकारेण व्याकरणशास्त्रसम्बद्धानां कारकविषयोल्लेखितग्रन्थानुसारं बहूनां विषयाणां निरूपणमपि अत्र वर्तते। अस्मिन् अन्वेषणात्मकलेखे षट्कारकाणां विषये अपि अतीव सूक्ष्मरूपेण वर्णनमस्ति। अत्र कारकसम्बन्धे परमलघुमञ्जूषायाः, भूषणसारस्य, लघुशब्देन्दुशेखरस्य तथान्यग्रन्थस्य साहाय्यं गृहीतं वर्तते।

**शब्दकुञ्जी** - कारकम्, कर्ता, कर्म, करणम्, सम्प्रदानमित्यादिः।

## विषयपरिचयः

अस्माकं सस्कृतवाङ्मये कारकाणामतीवमहत्त्वं वर्तते। संस्कृतवाङ्मये कारकाणां यावत्प्राधान्यं वर्तते, न तथा अन्येषाम्। कारकं व्याकरणस्य हृदयमिति उच्यते। किं नाम कारकमिति जिज्ञासायाम् — क्रमवतां वर्णानां समूहः पदम्। पदसमूहः वाक्यम्। वाक्यमभीप्सितमर्थं बोधयति। अतः शब्दप्रपञ्चे वाक्यं न भवति। विना वर्णेभ्यः पदं नास्ति। अतः व्याकरणे वर्णनिमित्तानि कार्याणि पदनिमित्तानि कार्याणि च सन्ति। प्रायः सन्धिकार्याणि वर्णनिमित्तकानि। समासादीनि पदनिमित्तकानि। वाक्यमवलम्ब्य प्रवृत्तानि भवन्ति, कारकाणि कारकसम्बन्धीनि कार्याणि च। साक्षात् परम्परया वा वाक्यानि संस्कर्तुमेव व्याकरण प्रवृत्तम्। सम्प्रति कारकाणि, कारकसम्बन्धीनि कार्याणि च इह प्रस्तूयन्ते। अत्र आरम्भे किं नाम वाक्यमिति ज्ञातव्यम्। कारकान्विता क्रिया वाक्यम्। यथा— अश्वः धावति, बालकः ग्रन्थं पठति। उपर्युक्तेषु वाक्येषु प्रथमवाक्ये कर्तृकारकेण धावनक्रिया अन्विता। द्वितीयवाक्ये कर्तृकारकेण कर्मकारकेण च अन्विता पठनक्रिया। किं नाम कारकम्? करोति क्रियां निष्पादयति इति वा कारकम्। कृञ् धातोः कर्तरि ण्वुलि

कारकशब्दसिद्धिः । साक्षात्क्रियाजनकत्त्वं कारकत्वमिति निष्कृष्टं लक्षणम् । क्रियानिष्पादकं यत् साधनं अथवा क्रियानिष्पादिका या शक्तिः सा कर्तृत्वशक्तिरेका एव तस्यैवान्तरव्यापारविवक्षायां कर्तृ कर्मादिभेदाः प्रतीयन्ते । यथोक्तम्— निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते । षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेर्निबन्धनम् । कारकाणि च कर्तृ, कर्म, करण, सम्प्रदान, अपादान, अधिकरणभेदेन षडेवेति प्रसिद्धानि । यथाहुराचार्याः—

कर्ता कर्म च करणं च सम्प्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षड् ॥

यद्यपि सर्वाणि कारकाणि स्वस्वावान्तर क्रियाद्वारा प्रधानक्रियां निष्पादयन्ति । तत्रापि क्रियाया निष्पत्तौ स्वतन्त्रः मुख्यश्च कर्ता भवति । यः क्रियां निष्पादयति सः कर्ता । अतः सः व्यापाराश्रयो भवति । क्रियासिद्धौ कर्तुरीप्सिततमं कर्म भवतीति सामान्यः नियमः । यत् कार्यनिष्पद्यते , फलाश्रयत्वेन अवगम्यते तत् कर्म भवति । कर्म च कर्तुरीप्सितमनीप्सितञ्चेति द्विधा । एवमपादानादीना अविवक्षितञ्चेत्यादि प्रकारान्तरेण बहुविधम् । यद्द्वारा क्रियानिष्पत्तिस्तत्साधनं करणम् । दानादेरुद्देश्यं सम्प्रदानम् । विभागादेरवधिरपादानम् । कर्तृकर्मद्वारा क्रियाधारोऽधिकरणमिति सामान्यनियमः ।

**शोधसमस्या**:

व्याकरणशास्त्रे शब्दानां अर्थापनाय कारकाणां महती उपयोगिता वर्तते । तत्र सामान्यपाठकानां मनसि कारक सम्बद्धाः जिज्ञासाः समुदियन्ति, अतोऽत्र कारकसम्बद्धाः अधोदर्शिताः समस्याः प्राधान्येन समुपस्थापिताः सन्ति —

(क) कारकस्य परिचयः कः?

(ख) कारकाणां सङ्ख्या का ?

(ग) कारकाणां उपयोगः कथं विधीयते ?

**शोधोद्देश्यम्**

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति । अस्य शोधकार्यस्यमुख्योद्देश्यानि अधोदर्शितरीत्या विभक्तुं शक्यन्ते —

(क) कारकस्य परिचय प्रतिपादनम् ।

(ख) षण्णां कारकाणां विश्लेषणम् ।

ग) कारकाणामुपयोगप्रदर्शनम् ।

**सैद्धान्तिकी अवधारणा**

व्याकरणशास्त्रे निहितान् सिद्धान्तान् प्रकटयितुं भूषणसारमञ्जूषावाक्यपदीयादिग्रन्था निर्मिता ज्ञायन्ते । अत एव व्याकरणशास्त्रस्य त्रिमुनिगदितसिद्धान्तान् व्यापकीकृत्य अर्थग्रन्था विरचिताः । अत्र मञ्जूषाभूषणसारादिग्रन्थे च स्फोटवादः , शक्तिविचारः, निपातार्थविचारः, समासशक्तिविचार इत्यादिवादाश्च सन्ति । एतेषां वादानां प्रादुर्भावश्च त्रिमुनिगदितसूत्रवृत्तिभाष्यवचनेनैव । यथा—पाणिनिना 'वर्तमाने लट्'(पाणिनिसूत्रम्,३,२,१२३) इति सूत्रकरणेन लट्लकारार्थत्वं वर्तमानत्वम्, उत लङ्घ्योत्यार्थत्वं वर्तमानत्वमिति सिद्धं भवति । इत्थं वादानां जन्मो भवति । कारकार्थविषयेऽपि नागेशेनोक्तम्— क्रियानिष्पादकत्वं कारकत्वम् । भाष्ये कारकशब्दस्य ' करोति क्रियां निर्वर्तयति' इति दर्शित व्युत्पत्त्या निष्पादकत्वं नाम जनकत्वं जनकत्त्वञ्चात्र कारणत्वरूपम् । कारणत्वञ्च अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् ।

## अध्ययनविधिः

प्रस्तुतशोधकार्ये कारकार्थकमीक्षणसन्दर्भे विश्लेषणविधिः प्रयुक्तः । कारकार्थत्वविषये विवरणात्मकशैल्या समीक्षणात्मकाञ्च विधयः समाश्रिताः वर्तन्ते ।

**सामग्रीसङ्कलनविधिः**

प्रस्तुतशोधकार्यसम्पादनाय पुस्तकालयविधिना मञ्जूषाभूषणसारग्रन्थानां प्राथमिकसामग्रीरूपेण तथा मूलग्रन्थटीकादीनां द्वितीयकसामग्रीरूपेण सङ्लनं कृतं विद्यते , तथा च महाभाष्यवाक्यपदीयादिग्रन्थाश्च सहायकसामग्रीरूपेण प्रयुक्ता विद्यन्ते ।

**कारकार्थनिरूपणम्**

क्रियानिष्पादकत्वं, क्रियान्वितविभक्त्यर्थान्विततत्वं क्रियानिर्वर्तकत्वं वा कारकत्वम् । तच्च षड्विधम् । तद्यथा—

कर्ता कर्म च करणं च सम्प्रदानं तथैव च ।

अपादानाधिकरणमित्याहुः कारकाणि षड् ॥ इति ।

षष्ठ्यर्थस्य तण्डुलादिनामार्थान्विततया क्रियाऽनन्वितत्वात् न कारकत्वम् । चैत्रस्य पचतीत्यादावपि तण्डुलादिपदाध्याहारेणैव साकाङ्क्षत्वेन सम्बन्धक्रिययोर्निराकाङ्क्षत्वात् । ननु क्रियानिमित्तत्वं कारकत्वमिति स्वीकार्यमिति चेन्न, चैत्रस्य तण्डुलं पचतीत्यत्र सम्बन्धिनि चैत्रादावतिव्याप्तेः ।

**कर्ता**

स्वतन्त्रः कर्ता (पाणिनिसूत्रम्,१,४,२५) क्रियायां स्वातन्त्रेण विवक्षितोऽर्थः कर्ता स्यात् इति सूत्रस्यार्थः । स्वातन्त्र्यं नाम व्यापाराश्रयत्त्वम् । एवञ्च व्यापाराश्रयः कर्ता इति फलितोऽर्थः । धात्वर्थः फलं व्यापारश्च इत्युक्तम् । तत्र व्यापारस्य य आश्रयः स कर्ता भवति । यथा —पाचकः पचति । पच्धातोरर्थः —पाकक्रियाया आश्रयः पाचकः । अतः पाचकः कर्ता । यथा—बालः खादति । 'खाद्' धातोरर्थः भक्षणक्रिया । सा क्रिया बाले अस्ति । अतः क्रियाया आश्रयः बालः । अतः बालः कर्ता । छात्रः लिखति । लिख्धातोरर्थः लेखनक्रिया । सा क्रिया छात्रे अस्ति । अतः लेखनक्रियाया आश्रयः छात्रः । अतः छात्रः कर्ता । सूर्य प्रकाशते । धात्वर्थः प्रकाशनक्रिया । सा क्रिया सूर्ये अस्ति । अतः प्रकाशनक्रियाया आश्रयः सूर्यः अतः सूर्यः कर्ता । इत्यादयः ।

प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम् । अन्यकारकनिष्ठो व्यापारस्तु न प्रकृतधातुवाच्यः। यथा वह्निना पचतीत्यत्र वह्निनिष्ठः प्रज्वलनादिः । अन्यकारकनिष्ठव्यापाराश्रयस्य कर्तृत्ववारणाय धातुवाच्येति । तत्रोक्ते तु कारकमात्रे प्रथमैव, 'तिङ्समानाधिकरणे प्रथमा' 'अभिहिते प्रथमे'ति वार्त्तिकद्वयात् । सूत्रमते तु कर्तृकर्माद्यर्थकप्रत्ययेन कर्तादे-रुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एवार्थः । तस्य चाख्यातार्थकर्त्रादिनाऽभेदान्वयेन प्रथमार्थस्य कारकत्वम् । अत एवाख्यातार्थद्वारकक्रियान्वयात् तदर्थस्य क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः। चैत्रो भवतीत्यत्र एकत्वावच्छिन्नचैत्राभिन्नकर्तृक भवनमिति बोधः। आख्यातकृदादिना कर्त्रादेरभिधानेऽपि प्रथमयाऽनुद्भूतकर्तृत्वादि शक्तिः प्रतिपाद्यते इति तात्पर्यम् । कर्मण्याख्याते तु 'चैत्रेण ग्रामो गम्यते' इत्यत्र चैत्रकर्तृकव्यापारजन्य एकत्वावच्छि न्नग्रामाभिन्नकर्मनिष्ठः संयोग इति बोधः ।

**कर्म**

कर्तुरीप्सिततमं कर्म (पाणिनिसूत्रम् ,१,४,४९) कर्तुः क्रियया आप्तुम् इष्टतमं कारकं कर्मसंज्ञं स्यात् इति सूत्रस्यार्थः।

कर्ता काञ्चित् क्रियां निर्वर्तयति। तया क्रियया किञ्चित् फलं जायते। तच्च फलं यत्र सम्बद्धं भवति तत् कर्मसंज्ञां प्राप्नोति। तथा च कर्तुः स्वक्रियाजन्यफलेन सम्बन्धुम् इष्यमाणं कारकं कर्मसंज्ञां स्यात् इत्यर्थः।

यथा - पाचकः तण्डुलं पचति। अत्र पच्धातोरर्थः विक्लित्तिरूपं फलं, तदनुकूलक्रिया च। पाकक्रियाया आश्रयः पाचकः कर्ता। कर्तुः पाचकस्य पाकक्रियाजन्यविक्लित्तिरूपफलेन सम्बन्धुम् इष्यमाणः तण्डुलः। अतः तण्डुलः कर्म भवति। एतदेव ज्ञातव्यं यत् अत्र पाचकः पाकक्रियां निर्वर्तयति। तण्डुले विक्लित्तिरूपः विकारः जायते। स्वपाकक्रियायाः तण्डुले विक्लितिरूपः विकारः (विक्लित्तिरूपफलं) जायताम् इति इच्छया एव पाचकः प्रवर्तते इति। यथा—

रामः ग्रामं गच्छति। गम्धातोरर्थः संयोगरूपं फलं तदनुकूलक्रिया च। गमनक्रियायाः आश्रयः रामः। अतः कर्तुः बालस्य गमनक्रियाजन्यसंयोगरूपफलेन सम्बद्धुम् इष्यमाणः ग्रामः। अतः ग्रामः कर्म भवति (गमनं नाम पूर्वदेशस्य त्यागः उत्तरदेशस्य प्राप्तिः)। रामः स्वगमनेन ग्रामे स्वसंयोगो भवतु इति इच्छति। देवदत्तः कूपं खनति। खन्धातोरर्थः अवदारणरूपं फलं तदनुकूलक्रिया च। खननक्रियायाः आश्रयः देवदत्तः। अतः देवदत्तः कर्ता। कर्तुः देवदत्तस्य खननक्रियाजन्यावदारणरूपफलेन सम्बन्द्धुम् इष्यमाणः कूपः। अतः कूपः कर्म भवति। अर्चकः विष्णुं भजति। भज्धातोरर्थः तुष्टिरूपफलं तदनुकूलक्रिया च। भजनक्रियाया आश्रय अर्चकः। अतः अर्चकः कर्ता। कर्तुः अर्चकस्य भजनक्रियाजन्यतुष्टिरूपफलेन सम्बद्धुम् इष्यमाणः विष्णुः। अतः विष्णुः कर्म भवति (भजनं नाम पूजनादिपरिचरणात्मिका क्रिया)। परिचरणात्मिकां क्रियाम् अर्चकः करोति। तया परिचरणात्मकक्रियया विष्णोः तुष्टिः भवति। अर्चकः भजनक्रियया विष्णोः तुष्टिरूपं फलं भवतु इति इच्छया खलु प्रवर्तते।

'कर्मणि द्वितीया' इत्यनुशासनात् कर्मत्वं द्वितीयार्थः (श्रीमद्गदाधरभट्टाचार्यः ; २०१७ : २८३)। तत्र कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्। इदमेव कर्मलक्षणे ईप्सिततमत्वम् 'गां पयो दोग्धि' इत्यादौ पयोवृत्तिर्यो विभागस्तदनुकूलो व्यापारो गोवृत्तिः, तदनुकूलश्च गोपवृत्तिः। अत्र पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः, जन्यत्वनिवेशे तन्न स्यात्। प्रयागात् काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति। न हि विभागः प्रकृतधात्वर्थः, किन्तु नान्तरीयकतया गमने उत्पद्यते। प्रयागस्य फलतावच्छेदकसम्बन्धेन फलाश्रयत्वेनानुद्देश्यत्वाच्च। ननु प्रकृतधात्वर्थग्रहणेनैवात्र वारणादुद्देश्यत्वनिवेशः किमर्थम् इति चेन्न, तस्यासाधारणं प्रयोजनं काशीं गच्छन्पथि मृत इति काश्याः फलाश्रयत्वाभावेऽपि फलाश्रयत्वे नोद्देश्यत्वसत्त्वात् कर्मत्वम्। ननु काशीं गच्छति चैत्रे चैत्रः काशीं गच्छति न प्रयागमिति प्रयोगानुपपत्तिः, प्रयागस्य फलाश्रयत्वेनोद्देश्यत्वाभावादिति चेत्, उच्यते (कर्मलक्षणे ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा। तथा च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यताविशेषशालित्वं कर्मत्वम्। तच्च प्रयागस्याप्यस्तीति कर्मत्वं तस्य सुलभम्। एतेन कार्यान्तरं कुर्वति चैत्रे किं ग्राम गच्छति अथवौदनं पचतीति प्रश्ने न ग्रामं गच्छति नौदनं पचतीत्यादिप्रयोगा व्याख्याताः। यत्र तु ताडनादिना पराधीनतया विषभोजनादिकं तत्र विषादि-तादृशफलाश्रयत्वेनोद्देश्यमेव। अत एव आतश्च विषमीप्सित यद्भक्षयति ताडनात्, इति भाष्यं सङ्गच्छते (झाः ; २०१८: ४९)। एतेन कशाभिहतः कारागारं गच्छतीति व्याख्यातम्। कालत्रये काशीगमनशून्ये चैत्रे काशीं गच्छति चैत्र इति वारणाय विशेष इति। काश्याः फलाश्रयत्वेनोद्देश्यत्वयोग्यतासत्त्वेऽपि तद्विशेषाभावात्र कर्मत्वम्। तद्विशेषश्च व्यापारसमकालिकस्तटस्थजनगम्यः।

नन्वत्र ओदनं भक्षयन् विषं भुङ्क्ते, ग्रामं गच्छँस्तृणं स्पृशतीत्यादौ विषतृणयोरुद्देश्यत्वाभावात् कथं कर्मत्वमिति चेत्, 'तथायुक्तमि'ति लक्षणान्तरात् । प्रकृतधात्वर्थप्रधानीभूतव्यापार प्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वमनीप्सितकर्मत्व मिति तदर्थात् । प्रयागात् काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति । द्वेष्योदासीनकर्मसङ्ग् रहार्थमिदं लक्षणम् । दुहादीनां व्यापारद्वयार्थकत्वपक्षे (क्षरणानुकूलव्यापारानुकूलव्यापारो दुहेरर्थ इत्यादिस्वीकारे) 'अकथितञ्च' इति व्यर्थम्, पूर्वेणैवेष्टसिद्धेः । एकव्यापारबोधकत्वपक्षे तु सम्बन्धषष्ठीबाधनार्थम् । तत्पक्षे कर्मसम्बन्धित्वे सति अपादानादिविशेषाविवक्षितत्वमकथितकर्मत्वमिति तृतीयलक्षणेन 'गां पयो दोग्धि' इत्यादौ गामित्यस्य कर्मत्वसिद्धिः(झाः ; २०१८ : ४९) ।

३. करण

साधकतमं करणम् (पाणिनिसूत्रम् ,१,४,४२) क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात् इति सूत्रस्यार्थः । यत् स्वव्यापारसमनन्तरमेव फलोत्पादकं तत्करणमिति फलितोऽर्थः । यथा- रामः बाणेन रावणं हन्ति । हन्धातोरर्थः प्राणवियोगरूपं फलं तदनुकूलक्रिया च, हननक्रियाश्रयः रामः । अतः सः कर्ता । प्राणवियोगरूपं फलं रावणे अस्ति । फलाश्रयत्वात् रावणः कर्म, धनुषः मुक्तः बाणः गच्छन् रावणं विध्यति । समनन्तरमेव प्राणवियोगः (फलम्) रावणे भवति। बाणस्य प्रवेशव्यापारसमनन्तरमेव प्राणवियोगरूपं फलम् उत्पन्नम् । अतः बाणः स्वव्यापारसमनन्तरमेव प्राणवियोगरूपफलोत्पादकः अस्तीति बाणः करणम् । अतः प्रकृष्टोपकारकं नाम स्वव्यापारसमनन्तरं फलोत्पादकमेव इति ज्ञेयम् । यथा-

भृत्यः परशुना वृक्षं छिनत्ति । छिद्धातोरर्थः विदारणरूपफलं, तदनुकूलक्रिया च । क्रियाश्रयो भृत्यः कर्ता । विदारणरूपं फलं वृक्षे अस्ति । अतः फलाश्रयत्वात् वृक्षः कर्म । भृत्यः हस्ताभ्यां परशुम् उपरि नीत्वा अधः पातयति । अनेकशः उपरिनयनाधः पतनव्यापारसमनन्तरमेव वृक्षे विदारणरूपं फलम् उत्पन्नम् । अतः परशुः स्वव्यापारसमनन्तरमेव विदारणरूपफलोत्पादकः वर्तते इति कारणात् परशुः करणम् । छात्रः पादाभ्यां गृहं गच्छति । गम्धातोरर्थः उत्तरदेशसंयोगः तदनुकूलक्रिया च । क्रियाश्रयः छात्रः कर्ता । संयोगरूपं फलं गृहे अस्ति । अतः फलाश्रयत्वात् गृहं कर्म । छात्रः पादौ उद्धृत्य निक्षिपति । अनेकशः उद्धरणनिक्षेपणव्यापारसमनन्तरमेव गृहे संगोगः उत्पन्नः । अतः पादौ स्वव्यापारसमनन्तरमेव संयोगरूपफलोत्पादकौ स्तः इति कारणात् पादौ करणम् । स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम् । इदमेव साधकतमत्वम् । क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरं विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥(भर्तृहरिः,वाक्यपदीयम् , पृ.९०)

इति हर्युक्तेः । क्रियाया इत्यस्य फलात्मिकाया इत्यर्थः । रामेण बाणेन हतो बालीत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पूर्वमपि कर्तरि सत्त्वात् । रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो यो बाणनिष्ठो व्यापारस्तज्जन्यं यत् प्राणवियोगरूप फलं तदाश्रयो बालीति बोधाच्च । रामो बाणेन बालिनं हन्तीत्यादौ कर्तृप्रत्यये बाणव्यापारजन्यो यो बालिनिष्ठः प्राणवियोगस्तदनुकूलो रामकर्तृको व्यापार इति बोधः। अर्थाद्रामव्यापारप्रयोज्यो बाणव्यापार इति पार्ष्णिको बोधः । कर्त्रादीनां पञ्चानां कारकाणां करणत्ववारणाय व्यापाराव्यवधानेनेति ।

**४. सम्प्रदानम्**

'कर्मणा यमभिप्रैति स सम्प्रदानम्' (पाणिनिसूत्रम् , १,४,३२) दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञं स्यात् इति सूत्रस्यार्थः। कर्मणा सम्बद्धम् यम् अभिप्रैति, सः सम्प्रदानं स्यादिति अर्थः। देयद्रव्योद्देश्यकं सम्प्रदानम् इति तात्पर्यार्थः।

यथा माता मोदकं पुत्राय ददाति। दाधात्वर्थस् हस्तादौ स्थापनरूपं फलं तदनुकूलक्रिया च। दान क्रियाश्रयः माता कर्ता। स्थापनरूपं फलं मोदके। अतः मोदकः कर्म। कर्मभूतेन तेन मोदके न माता के सम्बद्धुमभिप्रैति ? कर्मभूतेन मोदकेन पुत्रं सम्बद्धम् अभिप्रैति। अतः स पुत्रः सम्प्रदानं भवति। कर्मभूतं वस्तु यम् अधिगच्छति सः सम्प्रदानं भवति। अत्र कर्मभूतं वस्तु मोदकः पुत्रम् अधिगच्छति। अत्र पुत्रः सम्प्रदानं भवति। यथा—खण्डिकोपाध्यायः शिष्याय चपेटां ददाति। दाधात्वर्थः संयोगरूपं फलं तदनुकूलव्यापारश्च क्रियाश्रयः खण्डिकोपाध्यायः कर्ता। चपेटा नाम प्रसूतकरतलम्। संयोगरूपं फलं चपेटायाम्। अतः चपेटा कर्मभवति। कर्मभूतया चपेटया कं सम्बद्धुम् अभिप्रैति ? कर्म भूतया चपेटया शिष्यम् अभिसम्बद्धुम् अभिप्रैति। अतः शिष्यः सम्प्रदानं। कर्मभूता चपेटा शिष्यं खलु अधिगच्छति। देवदत्तः रजकाय वस्त्रं ददाति। दाधात्वर्थः अधीनीकरणं, तनुकूलक्रिया च। क्रियाश्रयः देवदत्तः कर्ता। अधीनीकरणरूपं फलं वस्त्रे। अतः वस्त्रं कर्म। कर्मभूतेन वस्त्रेण रजकं सम्बद्धुम् अभिप्रैति। अतः रजकः सम्प्रदानम्। कर्मभूतं वस्त्रं रजकं खलु अधिगच्छति। अतः रजकः सम्प्रदानम्। भूपालः ब्राह्मणाय गां ददाति। दाधात्वर्थः स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वारोपणं तदनुकूला क्रिया च। दानक्रियाश्रयः भूपालः कर्ता। स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वारोपणं गवि। अतः गौः कर्म। कर्मभूतया गवा भूपालः कं सम्बद्धुम् अभिप्रैति ? कर्मभूतया गवा ब्राह्मणम् अभिसम्बद्धुम् अभिप्रैति। अतः ब्राह्मणः सम्प्रदानम् अर्थात् कर्मभूता गौः ब्राह्मणं खलु अधिगच्छति। अतः ब्राह्मणः सम्प्रदानं भवति।

क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत्कारकं तत्त्वं सम्प्रदानत्वम्। यथा ब्राह्मणाय गां ददातीत्वादौ दानक्रियाकर्मभूतगोसम्बन्धाय ब्राह्मणो दानक्रियोद्देश्यः। गोब्राह्मणयोः स्वस्वामिभावः सम्बन्धः, चैत्रो मैत्राय वार्ताः कथयतीत्यत्र मैत्रवार्त्तयोर्ज्ञेयज्ञातृभावः सम्बन्धश्च। वृत्तिकारास्तु पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्रं ददातीति सम्बन्धसामान्ये षष्ठ्येवेत्याहुः, तन्त्र, 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाती'ति भाष्यविरोधात्। 'कर्मणा यमभिप्रैति' इति सूत्रव्याख्यावसरे भाष्यकृताऽन्वर्थसञ्जाया अस्वीकाराच्च। अत एव 'तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत्' इति सप्तशतीश्लोकः सङ्गच्छते (श्रीदुर्गासप्तशती; २०२१ : १२२)। तस्माद् रजकाय इति भवत्येव। अत्राधीनीकरणेऽर्थे ददातिः। चपेटां ददातीत्यत्र न्यसनेऽर्थे। वृत्तिकारास्तु पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्रं ददातीति सम्बन्धसामान्ये षष्ठ्येवेत्याहुः, तत्र 'खण्डिकोपाध्यायः शिष्याय चपेटां ददातीत्यत्र भाष्यविरोधात्। 'कर्मणा यमभिप्रैति' इति सूत्रव्याख्यावसरे भाष्यकृताऽन्वर्थसञ्जाया अस्वीकाराच्च। अत एव 'तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत्' इति सप्तशतीश्लोकः सङ्गच्छते। तस्माद् रजकाय इति भवत्येव। अत्राधीनीकरणेऽर्थे ददातिः। चपेटां ददातीत्यत्र न्यसनेऽर्थे। भाष्यकारस्तु क्रियाया अपि कृत्रिमकर्मत्वमस्त्येव, सूत्रे चास्मिन् कृत्रिमाकृत्रिमयो कृत्रिमे कार्यसम्प्रत्ययः इति न्यायेन कुत्रिममेव कर्म गृह्यते, न तु 'कर्तरि कर्मव्यतिहारे' (पाणिनिसूत्रम्, १.४।१४० इत्यादाविव क्रियासामान्यम्। एव उन 'पत्ये शेते' इत्यादौ सन्दर्शनप्रार्थनाध्यवसायजन्यारम्भक्रियानिरूपितं कर्मत्वमस्त्येवेति क्रियाग्रहण कर्तव्यमिति वार्तिक प्रत्याचख्यौ। अयं भावः कर्तादौ सन्दर्शनक्रियामिप्सति, ईप्सनक्रियोद्देश्यत्वच्च सन्दर्शनक्रियाया कर्मता सन्दर्शनक्रियया प्रार्थवतिक्रियामीप्सति, तेन प्रार्थयतिक्रियायाः कर्मसंज्ञा। एवं प्रकारेण प्रार्थयतिक्रियया अध्यवस्यतिक्रियाम्, अध्यवस्यतिक्रियया आरम्भणक्रियाम्, आरम्भणक्रियया वहया शयनादिक्रियामीप्सतीति आरम्भणक्रियोद्देश्यतया शयनादिक्रियायाः कर्मसंज्ञा। तादृशकर्मणाभिप्रेयमाणत्वञ्च पत्यादेरिति वचनं विनापि सिद्ध्यत्येव चतुर्थी। हरिरप्येवमाह-

संदर्शनं प्रार्थनायां व्यवसाये त्वनन्तरा।
व्यवसायस्तथारम्भे साधनत्वाय कल्पते॥ इति (वाक्यपदीयम् ३।७।१६)।
सम्प्रदानसूत्रे पदकृत्यविचारः-
क्रियानिरूपितकर्मणा करणभूतेन कर्ता यमभिप्रैति, तस्य सम्प्रदानसंज्ञानेन कर्मणा यमभिप्रैति- इत्यनेन विधीयते। 'विप्राय गां ददाती' त्यादौ कर्मणा गवा करणभूतेन राजा विप्रमभिप्रतीति तस्य सम्प्रदानसंज्ञा भवति। न चात्र एकस्यैव गोः कथं कर्मत्वं करणत्वमपीति शङ्क्यम्। क्रियाभेदेनादोषात्। दानक्रियायां गौ कर्म, अभिप्रयणक्रियायान्तु करणमिति। (सुब्रह्मण्य, सन् १९४१०)
**५. अपादानम्**
'ध्रुवमपायेऽपादानम्' (पाणिनिसूत्रम् ,१,४,२४) अपायः . विश्लेषः। ध्रुवम् . अवधिभूतम्। विश्लेषे साध्ये अवधिभूतं कारकम् अपादानं स्यात् इति सूत्रस्यार्थः। विभागाश्रयः अपादानं भवति। अपादानत्वविषये वाक्यकारेणाप्युक्तम्—
अपाये यदुदासीनं चलं वा यदि वा चलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते॥ (गोविन्दाचार्यः; २०२१:२७८)
यथा- वृक्षात् पर्णं पतति। पत् धातोरर्थः अधोदेशसंयोगरूपं फलं, तदनुकूलक्रिया च। पतनक्रियाश्रयः पर्णं कर्ता। अवधिभूतः विभागाश्रयः वृक्षः। अतः वृक्षः अपादानम्। अर्थात् यत्र अपादानस्य प्रसक्तिः तत्र द्वयोः संयुक्तयोः विभागः भवेत् एव। यथात्र संयुक्तयोः वृक्षपर्णयोः विभागः जातो वर्तते प्रकृतवाक्ये विभागः वृक्षे पर्णे च अस्ति। विभागस्य द्विनिष्ठत्वात्। अतः पर्णम् अपि विभागाश्रयः एव इत्यतः पर्णम् अपि किमर्थम् अपादानं न भवति इति शङ्का जायते। तत्रेदं समाधानम् - पर्णं यथा विभागाश्रयः तथा पतनक्रियाश्रयः अपि। अतः विभागाश्रयत्वात् पर्णम् अपादानसंज्ञाकं, पतनक्रियाश्रयत्वात् कर्तृसंज्ञाकमपि। एकस्मिन् एव द्वयोः प्रसक्तिः परसंज्ञा एव कर्तव्या। अष्टाध्याय्याम् अपादानसंज्ञायाः (१,४,२४) अपेक्षया कर्तृसंज्ञा (१,४,२५) एव परा। अतः पर्णस्य कर्तृसंज्ञा एव न तु अपादानसंज्ञा। 'विप्रतिषेधे परं कार्यम्' इति सूत्रं प्रमाणम्। यथा ( देवदत्तः ग्रामात् आगच्छति। आगमनक्रियाश्रयेः देवदत्त कर्ता। संयुक्तयोः देवदत्तग्रामयोस् देवदत्तस्य आगमनेन विभक्तः जातः। तदा अवधिभूतः विभागाश्रयः ग्रामः। अतः ग्रामस् अपादानम्। पान्थः पर्वतात् अवरोहति। अवरोहण क्रियाश्रयः पान्थः कर्ता। संयुक्तयोः पान्थपर्वतयोः अवरोहणेन विभागः जातः। तदा अवधिभूतः विभागाश्रयः पर्वतः। अतः पर्वत अपादानम्। खगः वृक्षात् डयते। डयनक्रियाश्रयः खगः कर्ता। संयुक्तयोः खगवृक्षयोः डयनेन विभागः जातः। तदा अवधिभूतः विभागाश्रयः वृक्षः। अतः वृक्षः अपादानम्।
तत्तत्त्वकर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वमपादानत्वम्। तदेवावधित्वम्। विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितोऽपि। 'माधुराः पाटलिपुत्रकेभ्य आढ्यतराः' इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात्। वृक्षं त्यजति खग इत्यादावपादानत्ववारणाय प्रकृतधात्ववाच्येति। 'परस्परस्मान्मेषावपसरत' इत्यत्रापादानत्वाय तत्तत्कर्त्रिति। तत्तत्पशुविशेषनिष्ठव्यापारजन्यविभागाश्रयस्तत्तत्पशुविशेषः। किञ्च, मेषपदवाच्ययोः पशुविशेषयोः क्रियाश्रयत्वविवक्षा, परस्परपदवाच्ययोस्तयोस्तु विभागाश्रयत्वविवक्षेत्यौपाधिकस्तयोर्भेदः। शब्दस्वरूपोपाधिकृतभेदोऽप्यर्थे गृह्यते। यथात्मानमात्मना वेत्तीत्यादौ, शरीरावच्छिन्नं कर्तृ, अन्तःकरणावच्छिन्नं करणं, निरवच्छिन्नं निरीहं कर्म। एकस्यैव शब्दभेदाद्

भेदः। शब्दालिङ्गितस्यैव सर्वत्र भानात्। नन्वौपाधिकभेदमादायैवात्रापादानत्वे सिद्धे किं तत्तत्कर्तृसमवेतेत्यनेनेति चेत्, न, पर्वतात्पततोऽश्वात् पतत्यश्ववाह इत्यादावश्वस्यापादानत्वाय तत्स्वीकारात्। ननु वृक्षात्पर्णं पततीत्यादौ तादृशफलाश्रयत्वात् पर्णस्यापादानत्वं विभागस्य द्विष्ठत्वादिति चेन्न, परया कर्तृसञ्ज्ञया बाधात्। अत एव 'अपादानमुत्तराणि कारकाणि बाधन्ते' इति भाष्यं सङ्गच्छते।

## अधिकरणम्

'आधारोऽधिकरणम्' (पाणिनिसूत्रम्,.१-४-४५) कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरणसंज्ञं स्यादिति सूत्रार्थः। कर्तरि विद्यमानक्रियायाः कर्मणि विद्यमानफलस्य वा आधारः अधिकरणसंज्ञकः भवति इत्यर्थः। कर्तृनिष्ठक्रिया कर्मनिष्ठक्रिया चेति द्विविधक्रिया अधिकरणस्य। यथा- (क) कर्तृनिष्ठक्रिया - वृद्धः खट्वायाम् उपविशति। उपोपसर्गपूर्वकविश्धातोरर्थः यत्किञ्चिदेशसंयोगरूपं फलम्, तदनुकूल क्रिया च। उपवेशनक्रियायाः आश्रयः वृद्धः कर्ता। वृद्धेः विद्यमानायाः क्रियायाः आधारः खट्वा। अतः खट्वा अधिकरणम्। (ख) कर्मनिष्ठक्रिया- पाचकः अन्नं स्थाल्यां पचति। पच्धातोरर्थः विक्लित्तिरूपफलं, तदनुकूला क्रिया च। पाकक्रियायाश्च पाचकः कर्ता। विक्लित्तिरूपफलस्य आधारः स्थाली। अतः स्थाली अधिकरणम्। वृद्धः खट्वायाम् उपविशति इति उदाहरणे उपवेशनक्रिया वृद्धे वर्तते। अतः साक्षात् क्रियायाः आधारः वृद्धः एव। वृद्धस्य क्रियायास् आधारः खट्वा। पाचकः अन्नं स्थाल्यां पचति इति उदाहरणे, विक्लितिरूपफलम् अन्ने वर्तते। अतः साक्षात्फलत आधारः अन्नम् एव। अन्नद्वारा फलस्य आधारस्स्थाली। अतः सर्वत्र परस्परया क्रियायाः फलस्य वा आधार एव अधिकरणं भवति इति ज्ञेयम्। अर्थात् कर्तुः कर्मणः वा आधार अधिकरणं भवति।

कर्तृकर्मद्वारकफलव्यापाराधारत्वमधिकरणत्वम्।यथास्थाल्यामोदनंगृहेपचतीत्यादौ कर्मद्वारकविक्लित्तिरूपफलाधारः स्थाली, कर्तृद्वारकव्यापाराधारो गृहमिति। साक्षात् क्रियाधारयोरोदनचैत्रयोर्नाधिकरणत्वम्, परत्वात् कर्तृकर्मसञ्ज्ञाभ्यां बाधात्। स्थाल्यधिकरणिका या ओदननिष्ठा विक्लित्तिस्तदनुकूलो गृहाधिकरणको मैत्रकर्तृको व्यापार इति बोधः। अधिकरणं त्रिधा। तत्र सकलावयवव्याप्तौ व्यापकाधारत्वम्। उप समीपे श्लेषः सम्बन्धः उपश्लेषस्तत्कृतमौप-श्लेषिकम्। 'इको यणचि' इत्यादौ औपश्लेषिकाधारे सप्तमी। तत्राजादिसामीप्यमेवेगादीनाम्। यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणम् मासिकं धान्यमिति भाष्योक्तेः। यत्तु कटे आस्ते इत्यौपश्लेषिकोदाहरणमुक्तं कैयटेन, तदयुक्तम्, उक्तभाष्यविरोधात्। एतदधिकरणद्वयातिरिक्तं वैषयिकमधिकरणम्, यथा कटे आस्ते, जले सन्ति मत्स्या इत्यादि। अभिव्यापकातिरिक्तं गौणमधिकरणमिति बोद्ध्यम्। सप्तम्यर्थोऽधिकरणम्। ज्ञापकक्रियाश्रयवाच कादुत्पन्नायाः सत्सप्तम्यास्तु क्रियान्तरज्ञापकत्वमर्थः। तत्रानिर्णीतकालिकायाः क्रियाया निर्णीतकालिका ज्ञापिका। 'गोषु दुह्यमानासु गतः' इत्यादौ गोनिष्ठदोहनक्रियाज्ञापितगमनाश्रयश्चैत्र इति बोधः।

## निष्कर्षः

क्रियानिष्पादकत्वं कारकत्त्वम्। कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणञ्चेति षट् कारकाणि आहुराचार्याः। भाष्ये कारकशब्दस्य 'करोति क्रियां निर्वर्तयति' इति दर्शितव्युत्पत्त्या निष्पादकत्वं नाम जनकत्वम्। जनकत्त्वञ्चात्र कारणत्वरूपम्। कारणत्वञ्च अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्षणावच्छेदेन कार्याधिकरणवृत्त्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्। तथा च 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यादौ ब्राह्मणस्य न कारकत्वम्, घटं प्रति कुलालपितृवत् चतुर्थान्यथासिद्धत्वात्। चतुर्थान्यथासिद्धिलक्षणचोक्तं

आचार्याः—'जनकं प्रतिपूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ' इति। अयं भावः- घटं प्रति कुलालपितुः पूर्ववर्तिताज्ञानं पश्चात् भवति पूर्वं घटजनकं कुलालं प्रति एव कुलालपितृत्वेन कुलालपितुः पूर्ववर्तिताज्ञानं भवति, अतः घटं प्रति कुलालपिता चतुर्थोऽन्यथासिद्धः । एवमेव प्रश्नरूपकार्यजनकं पुत्रं प्रति पुत्रजनकत्वेन ब्राह्मणस्य पूर्ववर्तिताज्ञानं प्रथमं भवति तदनुप्रश्नं प्रति ब्राह्मणस्यपूर्ववर्तिताज्ञानम्, अतो न ब्राह्मणस्य कारकत्वापत्तिः । 'जनिष्यमाणपुत्राय गां ददाती'त्यादौ सम्प्रदानसत्त्वेऽपि तज्ज्ञानमात्रेणैव तदुद्देश्येन दानदर्शनात् सम्प्रदानस्य क्रियाजनकत्वाभावेन कारकत्वं न स्यादिति चेन्न, असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालकत्वेनैव जनकत्वात् सम्प्रदानज्ञानवर्तिन्या दानजनकतायाः सम्प्रदाने आरोप इति भावः । एवं 'स्तोकं पचती' त्यादावपि विक्लित्यनुकूलव्यापारात् पूर्वकाले फलाभावेऽपि फलज्ञाने विद्यमानक्रियाजनकतायाः फले सत्त्वात् स्तोकमित्यादौ कर्मत्वम् । नन्वेवमपि घटस्यानुत्पत्तिदशायामेव 'घटं करोति' इति इष्यते स न स्यात् तदानीं घटाभावेन तत्र जनकत्वासम्भवात् एवं 'घटं स्मरति' इत्यादावपि घटे स्मरणजनकत्वासम्भवात् कारकत्वानापत्तिरिति चेन्न, ज्ञानमात्रं प्रति विषयस्य कारणतया घटोत्पत्तेः पूर्वं घटस्याभावे तद्विषयकज्ञानानुत्पत्तिप्रसङ्गात् बौद्धघटस्य कल्पनया बौद्धघटादेः पूर्वकालत्वेन उत्पत्यादिनिष्पादकत्वात् । अत्रापि 'घटं करोती'त्यत्र मृदादिवृत्तिजनकत्वस्य 'घटं स्मरती'त्यत्र च सम्बन्धिज्ञाननिष्ठजनकत्वस्यारोप इति भावः ।

## कृतज्ञताज्ञापनम्

शोधस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च साधु परीक्षणं विधाय सम्पादनाय परिष्काराय च महदुपकारं कृतवद्भ्यः सर्वेभ्यः विशेषज्ञेभ्यो गुरूजनेभ्यश्च सहयोगिभ्यश्चान्येभ्यः हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची

गोविन्दाचार्यः, वैयाकरणसिद्धान्तकौमुदी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, २०२१
झाः, बोधकुमारः, परमलघुमञ्जूषा, हंसप्रकाशन, नाटाणी भवन , चांदपोलबाजार जयपुर, २०१८
पाणिनिः, अष्टाध्यायी, चौखम्बासुरभारती प्रकाशन, वाराणसी, २०२१
भट्टः, नागेशः, परमलघुमञ्जुषा, हंसप्रकाशन, जयपुर,२०१८
भर्तृहरिः, वाक्यपदीयम् , वाराणसी, सुरसरस्वतीभवनग्रन्थमाला, २०३१
शास्त्री, सुब्रह्मण्य, वेङ्कटेश्वरशास्त्री, श्रीनागेशभट्टविरचितलघुशब्देन्दुशेखरः, श्रीविद्यामुद्रणालयः, आन्ध्रा १९४१
भर्तृहरिः, वाक्यपदीयम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९२
श्रीमद्गदाधरभट्टाचार्यः, व्युत्पत्तिवादः, भारतीयबुक कार्पोरेशन, जवाहरनगर,२०१७
श्रीदुर्गासप्तशती, गीताप्रेस, गोरखपुर, २०६१